A DESCRIPTIVE CATALOGUE

OF THE

SANSKRIT MANUSCRIPTS

IN THE

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

BY

M. RANGACHARYA, M.A., RAO BAHADUR,
PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE;
CURATOR, GOVERNMENT ORIENTAL MSS. LIBRARY; AND
REGISTRAR OF BOOKS, MADRAS.

Prepared under the orders of the Government of Madras.

VOL. XIV.—RELIGION—*continued.*

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1912.

CONTENTS.

CLASS VIII.

RELIGION—(*continued*).

5.—MANTRAS—(*continued*).

CONTENTS.

CLASS VIII.

RELIGION—(*continued*).

5.—MANTRAS—(*continued*).

5.—MANTRAS—(*continued*).

5.—MANTRAS—(*continued*).

5.—MANTRAS—(*continued*).

5.—MANTRAS—(*continued*).

5.—MANTRAS—(*continued*).

5.—MANTRAS—(*continued*).

5.—MANTRAS—(*continued*).

A DESCRIPTIVE CATALOGUE
OF THE
SANSKRIT MANUSCRIPTS.
VOLUME XIV.

CLASS VIII.—RELIGION—(*continued*).

5. MANTRAS—(*continued*).

No. 7007. राज्यलाभप्रदगोपालमन्त्रः.
RĀJYALĀBHAPRADAGŌPĀLAMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 54*a* of the MS. described under No. 5885

Complete.

This Mantra is in praise of Kṛṣṇa, conceived as the teacher of the Gītā and as the bestower of sovereignty.

Beginning:

अस्य श्रीराज्यलाभप्रदगोपालमन्त्रस्य गीताबोधनगोपालमन्त्रस्य च नारद ऋषिः, अनुष्टुप् छन्दः, गीताबोधनगोपालो देवता; ऐं बीजं, क्लीं शक्तिः, स्वाहा कीलकं, गीताबोधनगोपालप्रीत्यर्थे जपे विनियोगः ।

End:

ऐं क्लीं कृष्णाय नमः ॥

No. 7008. रामकवचम्.
RĀMAKAVACAM

Pages, 3. Lines, 9 on a page.

Begins on fol. 63*a* of the MS. described under No. 2[illegible]

Complete.

This Kavacamantra is addressed to Rama. It is believed to have the power to remove one's sins, and to secure protection to one from all kinds of harm and evil.

Beginning:

अस्य श्रीरामकवचस्तोत्रमन्त्रस्य विश्वामित्र ऋषिः, अनुष्टुप् छन्दः, श्रीमत्सीतालक्ष्मणभरतशत्रुघ्नसहितश्रीरामचन्द्रो देवता, मम समस्तपाप-क्षयार्थे समस्तभयनिवारणार्थे जपे विनियोगः । . . . . . .

शिरो मे राघवः पातु फालं दशरथात्मजः ।
कौसलेयो दृशौ पातु विश्वामित्रप्रियः श्रुती ॥

End:

इत्येतानि जपेन्नित्यं मद्भक्तिश्रद्धयान्वितः ।
अश्वमेधाधिकं पुण्यं सम्प्राप्नोति न संशयः ॥

Colophon:

इति श्रीरामकवचस्तोत्रं सम्पूर्णम् ॥

No. 7009. रामकवचम्.

RĀMAKAVACAM.

Pages, 7. Lines, 6 on page.

Begins on fol. 87*a* of the MS. described under No. 2549.

Complete.

Same as the above, except in the beginning which is given below:—

अस्य श्रीरामकवचस्तोत्रमन्त्रस्य विश्वामित्रभगवानृषिः, अनुष्टुप् छन्दः, श्रीरामचन्द्रो देवता; सीतां शक्तिः, मां कीलकं, मम सर्वचोर-व्याघ्र . . . . . भयनिवारणार्थे विनियोगः ।

No. 7010. रामकवचम्.

RĀMAKAVACAM.

Pages, 1. Lines, 5 on a page.

Begins on fol. 17*b* of the MS. described under No. 5938

Complete.

Slightly different from the above in the beginning as given below:—

अस्य श्रीरामकवचस्तोत्रस्य विश्वामित्र ऋषिः, अनुष्टुप् छन्दः, श्रीरामः परमात्मा देवता; सीता भगवती शक्तिः, श्रीरामचन्द्रप्रीत्यर्थे जप विनियोगः ।

No. 7011. रामकवचम्.

RĀMAKAVACAM.

Pages, 4. Lines, 8 on a page.

Begins on fol. 18*a* of the MS. described under No. 5781.

Complete.

Similar to the above

Beginning:

अस्य श्रीरामकवचस्तोत्रमन्त्रस्य बुधकौशिकविश्वामित्र ऋषिः, अनुष्टुप् छन्दः, सीताकल्याणसंयुक्तश्रीरामचन्द्रो देवता; रां बीजं, मन्त्रः कीलकं, श्रीं शक्तिः, मम समस्तव्याघ्रादिक्रूरमृगदुःखशोकव्याधिपरिहारार्थे श्रीरामचन्द्रप्रीत्यर्थे सकलाभीष्टफलसिद्ध्यर्थे जपे विनियोगः ।

See under number 7008 for the end and colophon.

No. 7012. रामकवचम्.

RĀMAKAVACAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 86*a* of the MS. described under No. 633.

Complete.

Similar to the above.

Beginning:

अस्य श्रीरामकवचस्तोत्रमन्त्रस्य विश्वामित्रभगवानृषिः, अनुष्टुप् छन्दः, श्रीसीतालक्ष्मणसहितश्रीरामचन्द्रो देवता, श्रीसीतालक्ष्मणसहितश्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

शिरो मे राघवः पातु फालं दशरथात्मजः ।
कौसलेयो दृशौ पातु विश्वामित्रप्रियः श्रुती ॥
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः ।

See under the previous number for the end.

Colophon:

श्रीरामकवचं समाप्तम् ॥

No. 7013. रामकवचम्.
RĀMAKAVACAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 5a of the MS. described under No. 757.

Complete, as found in the Hiraṇyagarbhasaṁhitā of the Śrutisārasaṅgraha.

Similar to the above.

Beginning:

अस्य श्रीरामकवचस्तोत्रमन्त्रस्य विश्वामित्र ऋषिः, अनुष्टुप् छन्दः, श्रीरामचन्द्रो देवता; रां बीजं, नमश्शक्तिः, आयेति कीलकं, मम श्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

शिरो मे राघवः पातु फालं दशरथात्मजः ।
कौसलेयो दृशौ पातु विश्वामित्रप्रियश्श्रुती ॥

See under the previous number for the end.

Colophon:

इति श्रुतिसारसङ्ग्रहे परमरहस्ये हिरण्यगर्भसंहितायां श्रीरामकवचस्तोत्रं सम्पूर्णम् ॥

No. 7014. रामकवचम्.
RĀMAKAVACAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 7a of the MS. described under No. 6231.

Incomplete.

Similar to the above.

Beginning:

अस्य श्रीरामकवचस्तोत्रमहामन्त्रस्य विश्वामित्रो भगवानृषिः, अनुष्टुप् छन्दः, श्रीरामचन्द्रपरमात्मा वासुदेवो देवता; रां बीजं, सीता इति शक्तिः, लक्ष्मण इति कीलकं, श्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

इन्दीवरश्यामलमायताक्षं धनुर्धरं नीलजटावजूटम् ।
पार्श्वद्वये लक्ष्मणमैथिलीभ्यां निषेव्यमाणं प्रणतोऽस्मि रामम् ॥

No. 7015. रामकवचम्.

RĀMAKAVACAM.

Substance, palm-leaf. Size, 11⅓ × 1⅓ inches. Pages, 7. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 26*b*. The other works herein are Saumyajāmātṛpūrvadinacaryā 1*a*, Yatirājaviṁśati 4*a*, Saumyajāmātṛmunyuttaradinacaryā 10*a*, Prārthanāpañcaka 14*a*, Śrīguṇaratnakōśa 15*a*, Ślōkadvaya 29*a*, Ślōkatraya 30*a*, Catuśślōkī 30*b*.

Complete.

Similar to the above.

Beginning :

ध्यात्वा नीलोत्पलश्यामं रामं राजीवलोचनम् ।
जानकीलक्ष्मणोपेतं जटामकुटमण्डितम् ॥
सासितूणधनुर्बाणपाणिं नक्तंचरान्तकम् ।
स्वलीलया जगत्रातुमाविर्भूतमजं विभुम् ॥

The remaining portion is the same as in the work described under No. 7008.

No. 7016. रामकवचम्.

RĀMAKAVACAM.

Substance, palm-leaf. Size, 14¼ × 1⅔ inches. Pages, 6. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Begins on fol. 12*b*. The other works herein are Saumyajāmātṛyōgidinacaryā (Pūrvā) 1*a*, Yatirājaviṁśati 6*a*, Saumyajāmātṛyōgidinacaryā (Uttarā) 8*b*, Prārthanāpañcaka 10*b*, Śrīstava 11*a*, Ślōkadvaya 15*a*, Catuśślōkī 15*b*, Śrīguṇaratnakōśa 16*a*, Kṣamāṣōḍaśī 27*a*.

Complete.

Same as the above.

No. 7017. रामकवचम्.
RĀMAKAVACAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 46*a* of the MS. described under No. 5858.

Complete, as found in the Viṣṇupurāṇa.

Similar to the above.

Beginning:

अस्य श्रीरामकवचस्तोत्रमन्त्रस्य बुद्धकौशिक ऋषिः, अनुष्टुप् छन्दः, सीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्रो देवता; रां बीजं, श्रीं शक्तिः, ह्रीं कीलकं, मम सर्वाभीष्टसिद्ध्यर्थे जपे विनियोगः ।

* * * *

ओं नमो भगवते रक्षोघ्नाय रघुनन्दनाय गुरवे सुप्रसन्नाय प्रणतार्तिहरायापरिमिततेजसे श्रीरामाय स्वाहा ।

End:

रामेति रामभद्रेति रामचन्द्रेति वा स्मरन् ।
नरो न लिप्यते पापैः भुक्तिं मुक्तिं च विन्दति ॥

Colophon:

इति श्रीविष्णुपुराणे रामचन्द्रकवचं सम्पूर्णम् ॥

No. 7018. रामकवचम्.
RĀMAKAVACAM.

Pages, 3. Lines, 10 on a page.

Begins on fol. 8*a* of the MS. described under No. 6090.

Complete.

Same as the above.

No 7019. रामकवचम्.
RĀMAKAVACAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 68*a* of the MS. described under No. 5953.

Complete, as found in the Pādmapurāṇa.

Similar to the above.

Beginning:

अस्य श्रीरामकवचस्तोत्रमन्त्रस्य वेदव्यासभगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीरामचन्द्रो देवता, श्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः ।

End:

सन्नद्धकवची खड्गी चापबाणधरो युवा ।
गच्छन् ममाग्रतो नित्यं रामः पातु सलक्ष्मणः ॥
श्रीरामः पातु सलक्ष्मण ओन्नम इति ॥

Colophon:

इति पाद्मपुराणे श्रीरामकवचं सम्पूर्णम् ॥

No. **7020.** रामकवचम्.
RĀMAKAVACAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 13*a* of the MS. described under No. 831.

Complete.

Same as the above.

No. **7021.** रामकवचम्.
RĀMAKAVACAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 2040.

Complete.

Similar to the above.

Beginning:

अस्य श्रीरामकवचस्तोत्रमन्त्रस्य विश्वामित्रभगवानृषिः, अनुष्टुप् छन्दः, श्रीरामचन्द्रो देवता; श्रीराम इति बीजं, लक्ष्मणाग्रज इति शक्तिः, सीतावल्लभ इति कीलकं, मम चतुर्विधपुरुषार्थसिद्ध्यर्थे जपे विनियोगः ।

See under No 7019 for the end.

Colophon:

रामकवचं सम्पूर्णम् ॥

No. **7022.** रामकवचम्.
RĀMAKAVACAM.

Pages, 3. Lines, 6 on a page.
Begins on fol. 7*b* of the MS. described under No. 6231.
Complete.
Similar to the above.

Beginning:

अस्य श्रीरामकवचस्तोत्रमहामन्त्रस्य विश्वामित्रभगवानृषिः, अनुष्टुप् छन्दः, रामचन्द्रपरमात्मा वासुदेवो देवता; सीता इति शक्तिः, लक्ष्मण इति बीजं, रामचन्द्र इति कीलकं, रामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

See under No. 7019 for the end.

No. **7023.** रामकवचम्.
RĀMAKAVACAM.

Pages, 2. Lines, 8 on a page.
Begins on fol. 45*a* of the MS. described under No. 369.
Complete.
Similar to the above.

Beginning:

शिरो मे राघवः पातु फालं दशरथात्मजः ।
कौसलेयो दृशौ पातु विश्वामित्रप्रियश्शुचिः(ती) ॥
घ्राणं पातु मखत्राणः मुखं सौमित्रिवत्सलः ।
दन्तान् दाशरथिः पातु तालु सालप्रभेदनः ॥

End:

जगज्जैत्रैकमन्त्रेण रामनामाभिरक्षितम् ।
यः करे धारयेत् सर्वे करस्थास्सर्वसिद्धयः ॥
वज्रपञ्जरनामैतत् यो रामकवचं पठेत् ।
अव्याहताज्ञस्सर्वत्र लभते जयमङ्गलम् ॥

No. 7024. रामकवचवज्रपञ्जरम्.

RĀMAKAVACAVAJRAPAÑJARAM.

Pages, 5. Lines, 4 on a page.

Begins on fol. 74*a* of the MS. described under No. 757.

Complete.

The repetition of this Mantra is believed to please Rāma and to secure safety and protection to one from thieves, cruel animals, evil spirits, etc., as if one were inside an adamantine enclosure.

Begnining :

अगस्त्य उवाच—

श्रृणु वक्ष्याम्यहं सौम्य सुतीक्ष्ण मुनिसत्तम ।
अद्वैतानन्यचैतन्यशुद्धसत्त्वैकलक्षणम् ॥
बहिरन्तस्सुतीक्ष्णास्मिन् रामचन्द्रः प्रकाशते ।
तत्त्वविद्योगिनो नित्यं रमन्ते चित्सुखात्मनि ॥
इति रामपदेनासौ परब्रह्माभिधीयते ।

* * * *

अस्य श्रीरामकवचस्तोत्रमन्त्रस्य अगस्त्यभगवानृषिः, श्रीं बीजं, सीता शक्तिः, मां कीलकं, सर्वचोरव्याघ्रयक्षगन्धर्वभूतप्रेतपिशाचकृत्रिमरोगज्वरप्रलयनिर्हरणार्थे श्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

श्रीरामः पातु मे मूर्ध्नि पूर्वस्मिन् रघुवंशजः ।
दक्षिणे मे रघुवरः पश्चिमे पातु राघवः ॥

End :

यः करे धारयेत्तस्य कवचं वज्रपञ्जरम् ।
आयुरारोग्यमैश्वर्यं लभेत्तत्र न संशयः ॥

सत्यव्रतौ रघुवरौ विमलौ बलाढ्यौ दैत्यान्तकौ सुरवरौ सुगुणौ महेशौ ।
. . . . विप्रप्रियौ नृपवरौ मनसा स्मरामि ॥

No. 7025. रामकीलकम्.

RĀMAKĪLAKAM.

Page, 1. Lines, 7 on a page.

Begins on fol. 18*a* of the MS. described under No. 757.

Complete, as found in Agastyasaṁhitā.

This Mantra is in praise of Rāma. It is said to be as efficacious as the six-syllabled Rāma-Mantra, and is intended to be repeated prior to the commencement of the repetition of the Rāmamantra. This is called Rāmakīlaka as it is believed to have the power to enable one to fix Rāma in one's mind as if with the aid of a peg.

Beginning:

अगस्त्य उवाच—

मन्त्ररूपं प्रवक्ष्यामि शृणु नारद तत्परः ।
अनलादिमकारान्तं मन्त्रं षड्वर्णसंयुतम् ॥
षडक्षरात्मकं मन्त्रं तारकं ब्रह्मसंज्ञितम् ।
राजेन्द्रं राघवं रामं राजानं रघुनन्दनम् ॥
राजीवलोचनं वन्दे राक्षसारिं रघूत्तमम् ।
रामभद्रं रघुवरं राजेशं रघुवल्लभम् ॥

End:

महादेवाय महते महेशाय महात्मने ।
मन्त्ररूपाय रामाय महतां पतये नमः ॥
इति श्रीरामचन्द्रस्य मन्त्रराजात्मकं स्तवम् ।

* * * *

एवं स्तुत्वा जपेन्मन्त्रं षट्सहस्रं दिने दिने ।
अष्टोत्तरसहस्रं वा यथाशक्त्यनुसारतः ॥

Colophon:

इत्यगस्त्यसंहितायां रामकीलकं समाप्तम् ॥

No. **7026.** रामखड्गस्तोत्रमन्त्रः.

RĀMAKHAḌGASTŌTRAMANTRAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 71*b* of the MS. described under No. 235.

Complete.

The repetition of this Mantra is intended to please Rāma. It is also believed to be efficacious in removing the fear of harm from evil spirits, the fear of an inundation by water, and the fear of being put into enchained bondage, etc.

Beginning:

अस्य श्रीरामखड्गस्तोत्रमन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीरामचन्द्रो देवता; रां बीजं, रीं शक्तिः, रूं कीलकं, मम श्रीरामचन्द्रप्रसादसिद्ध्यर्थे . . . . . गणपतिभयोदकभयबन्धनादिभयनिवारणार्थे जपे विनियोगः ।

End:

ओं ह्रीं श्रीं क्लीं हुं ओं खें खें क्षें क्षें फट् स्वाहा । श्रीरामचन्द्राय गरुडवाहनाय गजेन्द्रवरदाय श्रीरामचन्द्राय नमोऽस्तु नमोऽस्तु । ओं ह्रीं श्रीं क्लीं ओं यं ओं ह्रीं फट् स्वाहा ॥

No. 7027. रामगायत्री.

RĀMAGĀYATRĪ.

Page, 1. Lines, 11 on a page.

Begins on fol. 7*b* of the MS. described under No. 6090.

Complete.

This Mantra is in the form of the Gāyatrī-Mantra both in regard to its metre and in regard to the manner of contemplating the presiding diety, which manner consists in praying for inspiration to have thoughts about the deity contemplated. The word, Gāyatrī, implies that it protects the person who repeats that Mantra.

Beginning and **End**:

रामगायत्री —

दाशरथाय विद्महे सीतावल्लभाय धीमहि । तन्नो रामः प्रचोदयात् ॥

No. 7028. रामगायत्री.
RĀMAGĀYATRĪ.

Page, 1. Lines, 10 on a page.

Begins on fol. 95*a* of the MS. described under No. 5566, wherein this has been omitted to be included in the list of other works given therein.

Complete.

Same as the above.

No. 7029. रामगायत्री.
RĀMAGĀYATRĪ.

Page, 1. Lines, 6 on a page.

Begins on fol. 45*b* of the MS. described under No. 5858.

Complete.

Same as the above.

No. 7030. रामगायत्री.
RĀMAGĀYATRĪ.

Page, 1. Lines, 28 on a page.

Begins on fol. 214*b* of the MS. described under No. 581, wherein it is found to be in the Mantramālikā group given as other work therein.

Complete.

Same as the above.

No. 7031. रामचन्द्राष्टाक्षरीमन्त्रः.
RĀMACANDRĀṢṬĀKṢARĪMANTRAḤ.

Page, 1. Lines, 11 on a page.

Begins on fol. 6*a* of the MS. described under No. 6090.

Complete.

This Mantra which consists of eight syllables is considered to have the power of safe-guarding one through Rāma's favour from the evils that may come from various quarters.

Beginning:

अस्य श्रीरामचन्द्राष्टाक्षरीमहामन्त्रस्य वसिष्ठः ऋषिः, गायत्री छन्दः, श्रीरामचन्द्रो देवता; रामो बीजं, जानकी शक्तिः, हनूमान् कीलकं, श्रीहनुमत्सीतालक्ष्मणभरतशत्रुघ्नपरिवारसमेतश्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

पूर्वपश्चिमदक्षिणोत्तराकाशपातालादिसर्वदिशं बन्धय बन्धय यं रं लं वं शं षं सं हं ळं क्षं सर्वभूतयक्षराक्षसान् नाशय नाशय वं वटुकाय भूर्भुवस्सुवरोमिति दिग्बन्धः । मनुः—ओं श्रीं रां रामाय नमः॥

No. 7032. रामचन्द्राष्टाक्षरीमन्त्रः.
RĀMACANDRĀṢṬĀKṢARĪMANTRAḤ.

Pages, 2. Lines, 21 on a page.

Begins on fol. 19*b* of the MS. described under No. 2373.

Complete.

Same as the above.

No. 7033. रामचन्द्राष्टाक्षरीमन्त्रः.
RĀMACANDRĀṢṬĀKṢARĪMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol 44*a* of the MS. described under No. 5858.

Complete.

Same as the above.

No. 7034. रामतारकमन्त्रः.
RĀMATĀRAKAMANTRAḤ.

Page, 1. Lines, 8 on a page.

Begins on fol. 21*a* of the MS. described under No. 6090.

Incomplete.

The repetition of this Mantra is intended to enable one to obtain freedom from the bondage of Saṁsāra.

Beginning:

अस्य श्रीरामतारकमहामन्त्रस्य ब्रह्मा ऋषिः शिरसि, गायत्री छन्दः मुखे, सीतारामचन्द्रो देवता हृदये, रां बीजं नाभौ, रीं शक्तिः गुह्ये, स्वाहा इति कीलकं पादयोः, मम श्रीसीतारामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः।

End:

अथ मनुः—

सीता रां रामाय नमः। पुनः न्यासध्यानपञ्चपूजां कुर्यात्॥

हरिमर्कट मर्कट मन्त्रमिदं परिलिख्यति लिख्यति भूमित-
[(जेद) ले।

यदि मु(नह्य)ति मु(नह्य)ति वामकरे यदि (परि)नश्यति नश्यति
[शत्रुकुले(लम्)॥

. . . . परिमुञ्चति मुञ्चति शृङ्खलिकाम्।

No. 7035. रामतारकषडक्षरीब्रह्मविद्यामहामन्त्रः.
RĀMATĀRAKAṢAḌAKṢARĪBRAHMAVIDYĀMAHĀ-
MANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 5864, wherein it is given as Rāmabrahmavidyāṣaḍakṣarīmantra in the list of other works given therein.

Complete.

Similar to the above.

This Mantra consists of six syllables.

Beginning:

अस्य श्रीरामतारकषडक्षरीब्रह्मविद्यामहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीरामचन्द्रः परमात्मा देवता; रां बीजं दक्षिणस्तने, नमश्शक्तिः वामस्तने, रामायेति कीलकं हृदि, श्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः।

End:

गुरुदेवतात्मैक्यं विभावयन् दिनेदिने षट्सहस्रं त्रिसहस्रं सहस्रं त्रिशतं शतमेव वा मूलमन्त्रं मौनेन जपेत् । मनुः रां रामाय नमः ॥

No. **7036.** रामतारकषडक्षरीमन्त्रः.

RĀMATĀRAKAṢAḌAKṢARĪMANTRAḤ.

Pages, 2. Lines, 19 on a page.

Begins on fol. 9*b* of the MS. described under No. 2886.

Complete.

Similar to the above.

Beginning:

अस्य श्रीरामतारकषडक्षरीमन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीरामो देवता ; रां बीजं, रीं शक्तिः, रूं कीलकं, सीतारामप्रीत्यर्थे जपे विनियोगः ।

End:

पूर्ववद्ग्रथितश्चान्यत् तस्याद्यं त्रिः प्रकल्पयेत् ।
विदर्भग्रथितं नाम मन्त्रलक्षणमुत्तमम् ॥
सर्वकर्मकरं प्रोक्तं सर्वैश्वर्यफलप्रदम् ।
एवमेते प्रयोगाः स्युः सिद्धमन्त्रस्य सिद्धिदाः ॥

No. **7037.** रामदशाक्षरीमन्त्रः.

RĀMADAŚĀKṢARĪMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 287*b* of MS. described under No. 5477, wherein it is found to be in the Mantramālikā in the list of other works given therein.

Complete.

This Mantra consists of ten syllables and is believed to be efficacious in the accomplishment of one's desires.

Beginning :

अस्य श्रीराम(दशाक्षरी)मन्त्रस्य अगस्त्य ऋषिः, गायत्री छन्दः, श्रीरामचन्द्रो देवता; रं बीजं, ह्रीं शक्तिः, मम इष्टार्थसिद्ध्यर्थे विनियोगः ।

End :

मन्त्रः—

ओं ह्रीं (श्रीं क्लीं) रं रामाय नमः ॥

Colophon :

इति रामदशाक्षरी ॥

No. **7038.** रामदशाक्षरीमन्त्रः.

RĀMADAŚĀKṢARĪMANTRAḤ.

Page, 1. Lines, 28 on a page.

Begins on fol. 244*a* of the MS. described under No. 581, wherein it is found to be in the Mantramālika group given as other work therein.

Complete.

Similar to the above.

Beginning :

अस्य श्रीराम(दशाक्षरी)मन्त्रस्य अगस्त्य ऋषिः, गायत्री छन्दः, श्रीरामो देवता; ओं बीजं, ह्रीं शक्तिः, ममेष्टकाम्यार्थसिद्ध्यर्थे विनियोगः ।

End :

मन्त्रः—

ओं ह्रीं श्रीं (क्लीं रं) रामाय नमः ॥

No **7039.** रामदशाक्षरीमन्त्रः.

RĀMADAŚĀKṢARĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 91*b* of the MS. described under No. 5566.

Complete.

Same as the above.

No. 7040. रामदशाक्षरीमन्त्रः.
RĀMADAŚĀKṢARĪMANTRAḤ.

Page, 1. Lines, 28 on a page.

Begins on fol. 241a of the MS. described under No. 581, wherein it is found in the Mantramālikā group given as other work therein.

Complete.

Similar to the above.

Beginning and **End**:

हुं जानकीवल्लभाय स्वाहा —इति दशाक्षरी ॥

No. 7041. रामदुर्गकवचः.
RĀMADURGAKAVACAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 99a of the MS. described under No. 2549.

Complete.

The repetition of this Mantra which is addressed to Rāma is to secure protection for one from all dangers, as if one were protected by an impenetrable armour. It is believed to be also efficacious in wiping off one's sins and in securing salvation.

Beginning:

अस्य श्रीरामदुर्गकवचस्तोत्रमहामन्त्रस्य विश्वामित्र ऋषिः, अनुष्टुप् छन्दः, सीतारामचन्द्रो देवता; रां बीजं, नं शक्तिः, मः कीलकं, सीतारामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

श्रीरामो रक्षतु प्राच्यां रक्षेद्याम्यां च लक्ष्मणः ।
प्रतीच्यां भरतो रक्षेदुदीच्यां शत्रुसूदनः ॥
ईशान्यां जानकी रक्षेदाग्नेय्यां सूर्यनन्दनः ।

End:

रामदुर्गं पठेद्भक्त्या सर्वोपद्रवनाशनम् ।

सर्वपापक्षयं नृणां स गच्छेद्वैष्णवं पदम् ॥
अक्षय्यबाणतूणीरसमारोपितकार्मुकः ।
करे विराजितशरः श्रीरामश्शरणं मम ॥

No. **7042.** रामदुर्गम्.
RĀMADURGAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 757.

Complete.

The authorship of this Mantra is attributed to Viśvāmitra Similar to the above.

Beginning:

विश्वामित्र उवाच--

श्रीरामो रक्षतु प्राच्यां याम्यां चैव स लक्ष्मणः ।
प्रतीच्यां भरतो रक्षेदुदीच्यां शत्रुसूदनः ॥
ईशान्यां जानकी रक्षेदाग्नेय्यां सूर्यनन्दनः ॥
विभीषणश्च नैरृत्यां वायव्यां वायुनन्दनः ॥
ऊर्ध्वं रक्षेन्महाविष्णुर्मध्यं रक्षेन्नृकेसरी ।
श्रीरामाख्यं महादुर्गं विश्वामित्रकृतं शुभम् ॥
यः पठेद्भयकाले तु भयं तस्य विनश्यति ।
रामदुर्गं पठेद्भक्त्या सर्वोपद्रवनाशनम् ॥

End:

श्रीराम शत्रुसङ्घान् वै जहि मर्दय घातय ।
भूतप्रेतपिशाचादीन् श्रीराम नु विनाशय ॥

Colophon:

इति विश्वामित्रविरचितंरामदुर्गं संपूर्णम् ॥

No. 7043. रामदुर्गम्.
RĀMADURGAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 88*b* of the MS. described under No. 673.

Complete.

Similar to the above.

See under the previous number for the beginning.

End:

रामदुर्गं पठेन्नित्यं सर्वोपद्रवनाशनम् ।
सर्वशत्रुहरं नृणां स गच्छेद्वैष्णवं पदम् ॥

No. 7044. रामदुर्गम्.
RĀMADURGAM.

Page, 1. Lines, 5 on a page.

Begins on fol. 16*a* of the MS. described under No. 5938.

Complete.

Similar to the above.

See under the previous number for the beginning.

End:

यः पठेद्भयकाले तु सर्वशत्रुविनाशनम् ।
सर्वसम्पत्प्रदं नृणां विष्णुलोकं च शाश्वतम् ॥

Colophon:

श्रीरामदुर्गं सम्पूर्णम् ॥

No 7045. रामद्वादशाक्षरीमन्त्रः.
RĀMADVĀDAŚĀKṢARĪMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 287*b* of the MS. described under No. 5477.

Complete.

This Mantra consists of 12 syllables, and is addressed to Rāma; its repetition is believed to enable one to accomplish one's desires.

Beginning:

अस्य श्रीरामद्वादशाक्षरीमन्त्रस्य अगस्त्य ऋषिः, गायत्री छन्दः, श्रीरामचन्द्रो देवता; रं बीजं, श्रीं शक्तिः, ममेष्टकाम्यार्थसिद्ध्यर्थे विनियोगः ।

End:

मन्त्रः—

ओं ह्रीं भरताग्रज राम क्लीं स्वाहा । पूर्ववज्जपहोमः ॥

Colophon:

इति रामद्वादशाक्षरी ॥

No. **7046**. रामद्वादशाक्षरीमन्त्रः.

RĀMADVĀDAŚĀKṢARĪMANTRAḤ.

Page, 1. Lines, 28 on a page.

Begins on fol. 244*a* of the MS. described under No. 581, wherein it is found to be in the Mantramālikā group given in the list of other works therein.

Incomplete.

Similar to the above.

Beginning:

अस्य श्री(राम)द्वादशाक्षरमन्त्रस्य अगस्त्य ऋषिः, गायत्रीछन्दः, श्रीरामो देवता, रं बीजं, श्रीं शक्तिः, ममेष्टकाम्यार्थसिद्ध्यर्थे विनियोगः ।

End:

ध्यानार्चनादि पूर्ववत् । मन्त्रः—ओं ह्रीं (भरताग्रज राम क्लीं स्वाहा) ॥

No. **7047**. रामद्वादशाक्षरीमन्त्रः.

RĀMADVĀDAŚĀKṢARĪMANTRAḤ.

Pages, 2. Lines, 16 on a page.

Begins on fol. 94*b* of the MS. described under No. 5566.

Complete.

Same as the above.

No. 7048. राममन्त्रः.
RĀMAMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 12*b* of the MS. described under No. 5786.

Complete.

The due repetition of this Mantra is believed to secure the grace of Rāma.

Beginning:

रां रामाय नमः इति प्राणायामः १२. . . . . . .

अस्य श्रीराममहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीरामो देवता; श्रीरामप्रेरणया रामप्रीत्यर्थे जपे विनियोगः ।

End:

ओं रां रामाय नमः ओं—इति जपः । उपसंहारः पूर्ववत् ॥

No. 7049. राममन्त्रः.
RĀMAMANTRAḤ.

Pages, 3. Lines, 18 on a page.

Begins on fol. 286*b* of the MS. described under No. 5477.

Complete.

Similar to the above.

Beginning:

अस्य श्रीराममन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीरामचन्द्रो देवता; रं बीजं, नमश्शक्तिः, श्रीरामचन्द्रप्रसादसिद्ध्यर्थे विनियोगः ।

End:

मन्त्रः—

रं रामाय नमः । पुनश्चरणमक्षरलक्षं दशांशं तर्पणहोमः ॥

No. 7050. राममन्त्रः.
RĀMAMANTRAḤ.

Pages, 2. Lines, 28 on a page.

Begins on fol. 243*b* of the MS described under No. 581, wherein it is found to be in the Mantramālikā group.

Complete.

Different from the above only in the end which is given below:—

इति मूलमन्त्रः । पुरश्चरणं ६ लक्षम् । बिल्वफलपत्रपुष्प(ष्पेण)घृत-मधुशर्कराप्लुतेन दशांशहोमः ॥

No. 7051. राममन्त्रः.
RĀMAMANTRAḤ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 94*b* of the MS described under No. 5566.

Complete.

Same as the above

No. 7052. राममन्त्रकवचः.
RĀMAMANTRAKAVACAḤ.

Pages, 4. Lines, 6 on page.

Begins on fol. 16*a* of the MS. described under No. 757.

Complete, as found in the Brahmayāmala.

The repetition of this Kavacamantra is believed to be a necessary preliminary to the repetition of the Rāmamantra.

Beginning:

पार्वत्युवाच—

भगवन् सर्वदेवेश सर्वदेवनमस्कृत ।
सर्वं मे कथितं देव राममन्त्रं विशेषतः ॥
त्रैलोक्यमोहनं रामकवचं मम सूचितम् ।
कथयस्व महादेव यद्यहं तव वल्लभा ॥

* * * *

अस्य श्रीराममन्त्रकवचमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीरामचन्द्रो देवता, मम चतुर्वर्गसाधने विनियोगः ।

प्रणवो मे शिरः पातु तारकब्रह्मरूपधृत् ।
अनन्ताग्निसहस्रेन्दुर्नासामेकाक्षरोऽवतु ॥

रां रामाय नम इति षड्वर्णो भुक्तिमुक्तिदः ।
फालं पायान्नेत्रयुग्मं रामो व्यक्षरसंज्ञितः ॥

End:

अष्टोत्तरशतं जप्त्वा दशांशं होममाचरेत् ।
ततस्स्तुत्वा तु कवचं सर्वकार्याणि साधयेत् ॥
मन्त्रसिद्धिर्भवेत्तस्य पुरश्चर्यां विना हि सा ।

* * * *

इदं कवचमज्ञात्वा पूजये(प्रजपे)द्राममन्त्रकम् ॥
शतलक्षं प्रजप्तोऽपि न मन्त्रस्सिद्धिदायकः ।
स शस्त्रघातमाप्नोति शोचतां मृतिमाप्नुयात् ॥
सम्यग्ज्ञात्वा तु कवचं मन्त्रस्स्याच्छीघ्रसिद्धिदः ।
तस्मात् स्तोत्रं जपेन्नित्यं सर्वसिद्धिफलप्रदम् ॥

Colophon:

इति श्रीब्रह्मयामले पार्वतीश्वरसंवादे रामस्य त्रैलोक्यमोहनं नाम कवचं संपूर्णम् ॥

No. **7053.** राममालामन्त्रः.

RĀMAMĀLĀMANTRAḤ.

Pages, 3. Lines, 12 on a page.

Begins on fol. 6*a* of the MS. described under No. 6090.

Complete.

This Mantra is in praise of Rāma under various significant names. Its repetition is considered to have the power of destroying evil spirits and also one's enemies.

Beginning:

ओं नमो भगवते श्रीरामचन्द्राय अपरिमिततेजसे वीरबलमहापराक्रमाय रणोग्रभयङ्कराय हरचापखण्डनाय कोदण्डदीक्षागुरवे परशुरामगर्वापहरणाय विश्वामित्रयागसंरक्षणाय ताटकाप्राणनाशनाय अहल्याशापविमोचनाय ।

End:

ऐं सर्वविद्याय क्लीं जगत्रयवशीकरणाय सौः सर्वजनमनस्संक्षोभनाशायं श्रीं महासंपत्प्रदाय ग्लौं भूमण्डलाधिपतये द्रां चिरञ्जीविने श्रीरामाय सर्वभूतप्रेतपिशाचराक्षसदानवमर्दनरामाय रां रीं रूं रैं रौं रः मम सकलशत्रून्संहर श्रीबडबानलरामाय अघोररूपाय हुं फट् स्वाहा॥

द्वादशकृत्वः जपेत् ॥

No. **7054.** राममालामन्त्रः.

RĀMAMĀLĀMANTRAḤ.

Pages, 2. Lines, 21 on a page.

Bgins on fol. 20*a* o‘ the MS. described under No. 2373, wherein this has been omitted to be included in the list of the works contained therein.

Complete.

Same as the above.

No. **7055.** राममालामन्त्रः.

RĀMAMĀLĀMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 44*a* of the MS. desoribed under No. 5858.

Complete.

Same as the above.

No. **7056.** राममालामन्त्रः.

RĀMAMALĀMANTRAḤ.

Page, 1. Lines 11 on a page.

Begins on fol. 7*b* of the MS. described under **No. 6090,** wherein this has been omitted to be included in the list of other works contained therein.

Complete.

Similar to the above.

Beginning and **End:**

ओं नमो भगवते रघुनन्दनाय रक्षोघ्नविश(शार)दाय मधुरप्रसन्नवदनाय अमिततेजसे बलाय रामाय विष्णवे नमः ॥

No. 7057. राममालामन्त्रः.
RĀMAMĀLĀMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 45*b* of the MS. described under No. 5858, wherein this has been omitted to be included in the list of other works given therein.

Complete.

Same as the above.

No. 7058. राममालामन्त्रः.
RĀMAMĀLĀMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 287*b* of the MS. described under No 5477, wherein this is found in the Mantramālikā 273*a* given in the list of other works contained therein.

Complete.

Same as the above.

No. 7059. राममालामन्त्रः.
RĀMAMĀLĀMANTRAḤ.

Page, 1. Lines, 28 on a page.

Begins on fol. 244*a* of the MS. described under No. 581, wherein this is found in the Mantramālikā 229*a* given in the list of other works contained therein.

Complete.

Same as the above.

No. 7060. राममालामन्त्रः.
RĀMAMĀLĀMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 94*b* of the MS. described under No. 5566.

Complete.

Same as the above.

No 7061. राममालामन्त्रः.

RĀMAMĀLĀMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 17*b* of the MS. described under No. 5864, wherein this has been omitted to be included among the other works contained therein.

Complete.

Same as the above.

Colophon :

अयं मालामन्त्रः ॥

No. 7062. राममालामन्त्रः.

RĀMAMĀLĀMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 17*b* of the MS. described under No. 757.

Complete.

Same as the above with the difference that Rāmadaśākṣarī-mantra is added on at the end.

No 7063. राममालामन्त्रः.

RĀMAMĀLĀMANTRAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 17*b* of the MS described under No. 5864.

Complete.

Similar to the above.

Beginning :

अस्य श्रीराममालामन्त्रस्य वसिष्ठ ऋषिः, अनुष्टुप् छन्दः, श्री-राममालामन्त्रो देवता; रां बीजं, रीं शक्तिः, रूं कीलकं, मम श्री-रामचन्द्रमालामन्त्रदेवताप्रसादासिद्ध्यर्थे जपे विनियोगः।

End :

ओं मां मीं मूं मैं मौं मः, ओं रां रीं रूं रैं रौं रः, ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः, ग्रां ग्रीं ग्रूं ग्रैं ग्रौं ग्रः, ओं ळां ळीं ळूं ळैं ळौं ळः, ओं ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः हुं फट् स्वाहा ॥

No. 7064. रामवज्रकवचम्.
RĀMAVAJRAKAVACAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 1b of the MS. described under No. 5864

Complete.

The repetition of this Mantra relating to Rāma; is believed to confer on one long life, health and prosperity.

Beginning:

अस्य श्रीरामवज्रकवचमन्त्रस्य अगस्त्य ऋषिः, गायत्री छन्दः, श्रीरामचन्द्रो देवता ; रां बीजं, नमश्शक्तिः, आयेति कीलकं, श्रीरामचन्द्रप्रसादसिद्धयर्थे जपे विनियोगः ।

* * * *

श्रीरामः पातु मे मूर्ध्नि तत्पूर्वे रघुवंशजः ।
. . . . . रघुपतिः फालं दशरथात्मजः ॥

भ्रुवौ दूर्वादलश्यामः तयोर्मध्यं जनार्दनः ।
श्रोत्रे मे पातु राजेन्द्रो दृशौ राजीवलोचनः ॥

End:

इतीदं रामचन्द्रस्य कवचं वज्रनामकम् ।
गुह्याद्गुह्यतमं दिव्यं सुतीक्ष्ण मुनिसत्तम ॥
यः पठेच्छृणुयाद्वापि श्रावयेद्वा समाहितः ।

* * * *

यः पठेद्धारयेन्नित्यं कवचं वज्रसंज्ञिकम् ।
आयुरारोग्यमैश्वर्यं लभते नाम संशयः ॥

Colophon:

इति श्रीरामवज्रकवचं संपूर्णम् ॥

No. 7065. रामषडक्षरीतारकब्रह्ममहामन्त्रः.
RĀMAṢAḌAKṢARĪTĀRAKABRAHMAMAHĀ-
MANTRAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 48*a* of the MS. described under No. 235.

Complete.

This Mantra consisting of six syllables is addressed to Rāma. It is called Tārakabrahmamahāmantra, because its repetition is believed to be capable of enabling one to obtain salvation.

Beginning:

ततः द्विराचम्य मूलमन्त्रेण प्राणायामत्रयं कृत्वा पूरकं १२, कुम्भकं १६, रेचकं १०. सङ्कल्पः—मम उपात्तसमस्तदुरितक्षयद्वारा श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्रमुद्दिश्य श्रीरामचन्द्रप्रीत्यर्थं श्रीरामचन्द्रषडक्षरीतारकब्रह्ममहामन्त्रजपं करिष्ये ।

अस्य श्रीरामषडक्षरीतारकब्रह्ममहामन्त्रस्य ब्रह्मा ऋषिः शिरसि, गायत्री छन्दः मुखे, जिह्वाग्रे श्रीरामचन्द्रो देवता ।

End:

मनुः—

क्लीं रामाय नमः, ओं क्लीं रामाय नमः मूलं षट्सहस्रम् । (लं) पृथिव्यात्मने गन्धतन्मात्रप्रकृत्यानन्दात्मने श्रीरामचन्द्राय गन्धमुद्रया दिव्यश्रीगन्धं कल्पयामि, हं आकाशात्मने शब्दतन्मात्रप्रकृत्यानन्दात्मने श्रीरामचन्द्राय पुष्पमुद्रया नानाविधपुष्पाणि कल्पयामि, वौषट् यं वायव्यात्मने स्पर्शतन्मात्रप्रकृत्यानन्दात्मने श्रीधूपमुद्रया दिव्यश्रीधूपं कल्पयामि, रं वह्न्यात्मने रूपतन्मात्रप्रकृत्यानन्दात्मने श्रीरामचन्द्राय दीपमुद्रया सहस्रनीराजनं समर्पयामि ॥

No. 7066. रामषडक्षरीमन्त्रः.
RĀMAṢAḌAKṢARĪMANTRAḤ.

Page, 1. Lines, 11 on a page.

Begins on fol. 7*b* of the MS. described under No. 6098.

Complete.

This Mantra also consists of six syllables. Its repetition is held to be able to secure the grace of Rāma. The Mantra-formula here is the same as in Rāmatārakaṣaḍakṣarībrahmavidyāmahāmantra: *vide* No. 7035.

Beginning:

अस्य श्रीरामषडक्षरीमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीरामो देवता ; रां बीजं, नमश्शक्तिः, आयेति कीलकं, श्रीरामप्रसाद-सिद्ध्यर्थे जपे विनियोगः ।

End:

शङ्खं चक्रं गदापद्मं धेनुकौस्तुभगारुडाः ।
श्रीवत्सवनमाले च नव मुद्राश्च दर्शयेत् ॥

मनुः—रां रामाय नमः ॥

No. 7067. रामषडक्षरीमन्त्रः.

RĀMAṢAḌAKṢARĪMANTRAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 71*a* of the MS. described under No. 235.

Complete.

Different from the above only in the end as given below :—

तदनन्तरं पञ्चपूजां कुर्यात् । मनुः—रां रामाय नमः ।
तद्दशांशगायत्री—
दाशरथाय विद्महे सीतावल्लभाय धीमहि । तं नो रामः प्रचोदयात् ॥

No. 7068. रामषडक्षरीमन्त्रः.

RĀMAṢAḌAKṢARĪMANTRAḤ

Page, 1. Lines, 6 on a page.

Begins on fol. 45*b* of the MS described under No. 5858.

Complete.

Same as the above.

No. 7069. रामषडक्षरीमन्त्रः.

RĀMAṢAḌAKṢARĪMANTRAḤ.

Page, 1. Lines, 19 on a page.

Begins on fol. 13*b* of the MS. described under No. 6045.

Complete.

Similar to the above.

Beginning :

अस्य श्रीरामषडक्षरीमहामन्त्रस्य अगस्त्य ऋषिः, गायत्री छन्दः, श्रीरामचन्द्रो देवता; रां बीजं, रूं शक्तिः, रैं कीलकं, मम श्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः ।

End :

लं इति पञ्चपूजा । अथ मनुः ।

ब्रह्मार्पणं ब्रह्म हविः . . ब्रह्मकर्मसमाधिना ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिस्वभावात् ।

करोमि यद्यत् सकलं परस्मै श्रीरामचन्द्रेति(न्द्राय) समर्पयामि ॥

No 7070. रामषडक्षरीमन्त्रः.

RĀMAṢAḌAKṢARĪMANTRAḤ.

Substance, palm-leaf. Size, $10\frac{3}{4} \times 1$ inches. Pages, 3. Lines, 3 on a page. Character, Telugu. Condition, injured. Appearance, new.

Incomplete.

Similar to the above.

Beginning :

अस्य श्रीरामषडक्षरीमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, सीतारामो देवता, रां बीजं, रीं शक्तिः, रूं कीलकं, रामषडक्षरीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

कालाम्भोधरकान्तिकान्तमनिशं वीरासनेऽध्यासिनं
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानु(नि) ।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तीं विविधाङ्गदादिमकुटाकल्पोज्ज्वलाङ्गं भजे ॥

लं पृथिव्यादिपञ्चपूजा ॥

No. **7071.** रामषडक्षरीमन्त्रः.
RĀMASAḌAKṢARĪMANTRAḤ.

Page, 1. Lines, 9 on a page.

Begins on fol. 63*a* of the MS. described under No. 21.

Complete.

Different from the above only in the end as given below :—

पञ्चपूजा । मनुः—ओं श्रीं रां रामाय नमः । यथाशक्ति जपः, जपान्ते दिग्विसर्गः ॥

No. **7072.** रामषडक्षरीमन्त्रः.
RĀMASAḌAKṢARĪMANTRAḤ.

Pages, 2 Lines, 7 on a page.

Begins on fol. 57*a* of the MS. described under No. 5660.

Complete.

Similar to the above

Beginning :

अस्य श्रीरामषडक्षरीमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीजानकीसहितश्रीरामचन्द्रो देवता; ओं रां बीजं, ओं रीं शक्तिः, ओं रूं कीलकं, मम श्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

पञ्चपूजा । मनुः – ओं रां रामाय नमः ।
उत्तरन्यासं कुर्यात् । दिग्विमोकः ॥

No. **7073.** रामषोडशाक्षरीमन्त्रः.

RĀMAṢŌḌAŚĀKṢARĪMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 288*a* of the MS. described under No. 5477, wherein this is found in the Mantramālikā 273*a* given therein in the list of other works.

Complete.

This Mantra as given in the extract is found to consist of more than 16 syllables.

Beginning and **End**:

पुनष्षोडशाक्षरीमन्त्रभेदः—

ओं द्रां दाशरथाय सीतावल्लभाय त्रैलोक्यनाथाय नमः । पूर्ववज्जपहोमः ॥

Colophon:

इति राम(षोडशाक्षरी)मन्त्रभेदः ॥

No. **7074.** रामषोडशाक्षरीमन्त्रः.

RĀMAṢŌḌAŚĀKṢARĪMANTRAḤ.

Pages, 2. Lines, 28 on a page.

Begins on fol. 244*a* of the MS. described under No. 581, wherein this is found in the Mantramālikā 222*a* given in the list of other works contained therein.

Complete.

Similar to the above.

Beginning and **End**:

षोडशाक्षरमन्त्रः प्रकारान्तरम्—

ओं ह्रीं द्रां दाशरथाय सीतावल्लभाय त्रैलोक्यनाथाय नमः ॥

No. **7075.** रामषोडशाक्षरीमन्त्रः.

RĀMAṢŌḌAŚĀKṢARĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 95*a* of the MS. described under No. 5566.

Complete.

Same as the above.

No. 7076. रामषोडशाक्षरीमन्त्रः.
RĀMAṢŌḌAŚĀKṢARĪMANTRAḤ.

Page, 1. Lines, 10 on a page.

Begins on fol. 95*a* of the MS. described under No. 5566.

Complete.

Same as the above

No 7077. रामषोडशाक्षरीमन्त्रः.
RĀMAṢŌḌAŚĀKṢARĪMANTRAḤ.

Page, 1. Lines, 28 on a page.

Begins on fol. 244*a* of the MS. described under No. 581, wherein this is found in the Mantramālikā given in the list of other works contained therein.

Complete.

This Mantra consists of 16 syllables only, if the last word is not taken into account.

Beginning :

अस्य षोडशाक्षरश्रीराममन्त्रस्य अगस्त्य ऋषिः, बृहती छन्दः, श्रीरामो देवता; हं बीजं, रं शक्तिः, ममेष्टकाम्यार्थसिद्ध्यर्थे विनियोगः ।

End :

नमः सीतापतये रामाय हन हन हुं फट् स्वाहा ॥

No. 7078. रामषोडशाक्षरीमन्त्रः.
RĀMAṢŌḌAŚĀKṢARĪMANTRAḤ.

Pages, 2. Lines, 18 on a page.

Begins on fol. 287*b* of the MS. described under No. 5477, wherein this is found in the Mantramālikā 273*a* given in the list of other works contained therein.

Complete.

Same as the above.

No. 7079. रामाष्टादशाक्षरमन्त्रः.
RĀMĀṢṬĀDAŚĀKṢARAMANTRAḤ.

Page, 1. Lines, 6 on a page.

Begins on fol. 17*b* of the MS. described under No. 757, wherein this has been omitted to be included in the other works contained therein

Complete.

This Mantra consists of 18 syllables and is held to be able to secure protection to one at all times.

Beginning:

ओं ह्रीं जानकीवल्लभाय स्वाहेत्याग्नेय्यां मां सदावतु । ओं ह्रीं श्रीं भरताग्रजराम क्लीं स्वाहेति पातु मां नैरृत्यां सदा प्रभुः । ओं श्रीं जानकीवल्लभाय स्वाहा इति वायव्यां(व्यायां) मां सदावतु ।

End:

ओं नमो भगवते रामाय महापुरुषाय नमः । इत्यष्टादशाक्षरो मन्त्रो मामेव सर्वदावतु ॥

No. 7080. राशिन्यासः.
RĀŚINYĀSAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 44*b* of the MS. described under No. 673.

Complete.

On the ceremonial touching of certain parts of the body while repeating the Mantra-formula formed by combining the successive letters of the alphabet with each of the names of the twelve constellations which constitute the zodiacal signs.

Beginning:

अथ राशिन्यासः—

रक्तं श्वेतं हरिद्वर्णं पाण्डु चित्रं सितं स्मरेत् ।
पिशङ्गपिङ्गलौ बभ्रुकर्बुरा नीलधूम्रकाः ॥

इति ध्यात्वा अं आं इं ईं मेषराशये नमः दक्षगुल्फे, उं ऊं वृषभराशये नमः दक्षजानुनि, ऋं ॠं मिथुनराशये नमः दक्षवृषणे ।

End:

ओं तं थं दं धं मकरराशये नमः वामवृषणे, पं फं बं भं कुम्भराशये नमः वामजानुनि, यं रं लं वं शं षं मनिराशये नमः वामगुल्फे, इति मातृकावर्णैः न्यस्येत् ॥

Colophon:

इति राशिन्यासस्समाप्तः ॥

No. **7081.** राहुकवचम्.

RĀHUKAVACAM.

Pages, 2. Lines, 19 on a page.

Begins on fol. 51*a* of the MS. described under No. 2886, wherein it has been given as Navagrahakavacam in the list of other works given therein.

Complete.

Addressed to Rāhu considered to be a planet. This Mantra is intended to propitiate that planet.

Beginning:

अस्य श्रीराहुकवचस्तोत्रमहामन्त्रस्य चन्द्र ऋषिः, अनुष्टुप्, राहुर्देवता; सर्वाभीष्ट—गः ।

* * * *

नीलाम्बरः शिरः पातु ललाटं लोकवन्दितः।
चक्षुषी पातु मे राहुः श्रोत्रे मेऽर्धशरीरवान् ॥

End:

स्वर्भानुर्जानुनी पातु जङ्घे मे पातु चाप्यहिः।
गुल्फौ ग्रहाधिपः पातु नीलचन्दन. . . ॥

No. 7082. राहुमन्त्रः.
RĀHUMANTRAḤ.

Page, 1. Lines, 18 on a page.

Begins on fol. 311*b* of the MS. described under No. 5477.

Complete.

Similar to the above.

Beginning:

अस्य श्रीराहुग्रहमन्त्रस्य वामदेव ऋषिः, राहुर्देवता, गायत्री छन्दः, मम राहुप्रसादसिद्ध्यर्थे विनियोगः ।

End:

मन्त्रः—ओं ह्रां ह्रीं ह्रूं राहवे नमः। लक्षं जपः। दशांशहोमः ॥

No. 7083. रुद्रकवचम्.
RUDRAKAVACAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 73*a* of the MS. described under No. 1?2

Complete as found in the Vāyupurāṇa.

This Kavacamantra is addressed to Rudra, i.e., Śiva; and its repetition is held to enable one to secure his favour and protection.

Beginning:

अस्य श्रीरुद्रकवचस्तोत्रमहामन्त्रस्य अनुष्टुप् छन्दः, श्रीदुर्वासा ऋषिः, श्रीमहारुद्रो देवता; ओं बीजं, ह्रीं शक्तिः, श्रीः कीलकं, मम कायजीवसंरक्षणार्थे श्रीमहादेवप्रसादसिद्ध्यर्थे जपे विनियोगः ।

* * * *

प्रणम्य शिरसा रुद्रं स्वयम्भूर्भुवनेश्वरः ।
एकं सर्वगतं देवं सर्वदेवमयं प्रभुम् ॥
रुद्रकौचं प्रवक्ष्यामि अङ्गप्राणसुरक्षितम् ।
अहोरात्रं महादेव रक्षाभू(यै)देवनिर्मितम् ॥

ब्रह्मोवाच—

रुद्रो ममाग्रतः पातु पृष्ठतः पातु शङ्करः ।
कपर्दी दक्षिणं पातु वामपार्श्वे तथा हरः ॥

End:

त्राहि त्राहि जगन्नाथ त्राहि त्राहि जगन्मय ।
त्राहि मां पार्वतीकान्त त्राहि मां भक्तवत्सल ॥
आसन्ध्यं कीर्तयेच्छक्त्या प्रयाति परमां गतिम् ।
मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥

Colophon:

इति वायुपुराणे रुद्रकवचं संपूर्णम् ॥

No. **7084.** रुद्रकवचम्.
RUDRAKAVACAM.

Pages, 2. Lines, 8 on a page.

Begins on fol. 130*a* of the MS. described under No 119.

Complete.

Similar to the above.

The popular belief regarding the religious efficacy of this Mantra is well expressed in the concluding stanzas

Beginning:

अस्य रुद्रकवचस्य अनुष्टुप् छन्दः, दूर्वासभगवानृषिः, त्रियम्बक-रुद्रो देवता ; ह्रीं बीजं, ह्रूं शक्तिः, ह्रैं कीलकं, श्रीसदाशिवमहादेवप्री-त्यर्थे जपे विनियोगः ।

प्रणम्य शिरसा देवं सर्वदेवमयं प्रभुम् ।
महादेवप्रसादेन दूर्वासमुनिकल्पितम् ॥
अथातो रुद्रकवचं प्रवक्ष्याम्यानुपूर्विकम् ।
रहस्यं देवदेवेश रक्षार्थं निर्मित (तं)पुरा ॥
रुद्रो मामग्रतः पातु पृष्ठतः पातु शङ्करः ।
कपर्दी दक्षिणे पातु वामपार्श्वे हरो हरः ।

End:

पुत्रार्थी लभते पुत्रान् धनार्थी लभते धनम्।
विद्यार्थी लभते विद्यां मोक्षार्थी मोक्षमाप्नुयात् ॥
इत्येतद्रुद्रकवचं पवित्रं पापनाशनम्।
मुच्यते सर्वपापेभ्यो रुद्रलोकं स गच्छति ॥

Colophon:

श्रीरुद्रकवचं संपूर्णम् ॥

No. **7085.** **रुद्रकवचम्.**

RUDRAKAVACAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 148*a* of the MS. described under No. 781.

Complete.

Similar to the above.

Beginning:

प्रणम्य शिरसा देवं स्वयंभूर्भुवनेश्वरः ।
एकं सर्वगतन्देवं सर्वलोकमहेश्वरम् ॥
रुद्रकौचं प्रवक्ष्यामि अङ्गप्राणाभिरक्षितम् ।
अहोरात्रं प्रसादेन रक्षार्थं देवनिर्मितम् ॥

अस्य श्रीरुद्रकवचस्तोत्रमन्त्रस्य अघोर ऋषिः, अनुष्टुप् छन्दः, मृत्युञ्जयत्रियम्बकरुद्रो देवता; ह्रां बीजं, श्रीः शक्तिः, ह्रूं कीलकं, मम इष्टकाम्यार्थनित्या(सिद्ध्य)र्थं श्रीरुद्रप्रसादसिद्ध्यर्थं जपे विनियोगः ।

* * * *

रुद्रो ममाग्रतः पातु पृष्ठतः पातु शङ्करः ।

End:

त्राहि मां पार्वतीनाथ त्राहि मां त्रिपुरान्तक ।
त्रिसन्ध्यं कीर्तयेद्भक्त्या प्राप्नोति परमां गतिम् ॥

Colophon:

रुद्रकवचं संपूर्णम् ॥

No. 7086. रुद्रकवचम्.
RUDRAKAVACAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 21*a* of the MS. described under No. 5422.

Complete.

Same as the above.

No. 7087. रुद्रकवचम्.
RUDRAKAVACAM.

Pages, 8. Lines, 5 on a page.

Begins on fol. 53*a* of the MS. described under No. 6600.

Complete.

Same as the above.

No. 7088. रुद्रमालामन्त्रः.
RUDRAMĀLĀMANTRAḤ.

Page, 1. Lines, 9 on a page.

Begins on fol 84*b* of the MS. described under No 21, wherein it is given as Rudramantra.

Complete.

This Mantra, which praises Rudra under different significant names, is held to have the power to secure protection to one, to cause annoyance to one's enemies in various ways, to drive off evil spirits, and to counteract the effects of hostile Mantras, etc.

Beginning:

शरीररक्षणरुद्रमन्त्रः—

ओं नमः पशुपतये नानाभूताधिपतये ओं नमो रुद्राय ल ल ल ल ल ल ल खड्गरावणबलिं विहर नृत्य नृत्य श्मशानभस्मार्चितशरीराय उग्रतेजोमयाय.

End:

विध्वंस विध्वंस प्रवेशय प्रवेशय आवेशय आवेशय पूर्वप्रतिष्ठानां साधु शोषाय परविद्याच्छेदनाय ह्रा ह्रीं हुं फट् शिवाय इति उच्चाटनम्॥

No. **7089.** रुद्रहृदयम्.

RUDRAHṚDAYAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 67*a* of the MS. described under No. 132.

Complete as found in the Skāndapurāṇa.

This Mantra is also addressed to Rudra. Its repetition is held to be efficacious in removing one's sins, in conferring prosperity and long life on one, and in enabling one to obtain salvation. The word Hṛdaya as applied to Mantras indicates their high religious value and mystic efficacy and importance.

Beginning:

अस्य श्रीरुद्रहृदयस्तोत्रमन्त्रस्य नन्दिकेश्वर ऋषिः, सदाशिवो देवता, अनुष्टुप् छन्दः, सदाशिवप्रीत्यर्थे रुद्रहृदयस्तोत्रपठने विनियोगः ।

ओङ्काराय विरूपाय विशुद्धाय नमो नमः ।
शम्भुस्स्ववि(यं)भु(भू)र्भगवान् भूर्भूदाय नमो नमः ॥
अग्निमीळे नमस्तुभ्यं मा नस्तोके नमो नमः ।
अग्नये रुद्ररूपाय अग्न आ याहि वीतये ॥

End:

रुद्रस्य हृदयं प्रोक्तं स्तवं नन्दिमुखेहृद(रित)म् ।
त्रिसन्ध्यं यः पठत् स्तोत्रं सोऽपि सायुज्यमाप्नुयात् ॥
भ्रूणहत्यादिकं पापं स्मरणादेव नश्यति ।
किमत्र बहुनोक्तेन पापं यत् पूर्वसञ्चितम् ॥
तत्सर्वं नश्यति क्षिप्रं स्तोत्रपाठान्न संशयः ।
आयुरारोग्यमैश्वर्यज्ञानवित्तप्रदं भवेत् ॥

Colophon:

इति श्रीमत्स्कान्दे काशिखण्डे नन्दिकेश्वरप्रोक्ते रुद्रहृदयं समाप्तम् ॥

No. 7090 रुद्रहृदयम्.
RUDRAHṚDAYAM.

Pages, 9. Lines, 5 on a page.

Begins on fol. 48*a* of the MS. described under No. 5836.

Complete.

Same as the above.

No. 7091. रुद्रहृदयम्.
RUDRAHṚDAYAM.

Pages. 4. Lines, 6 on a page

Begins on fol. 96*b* of the MS. described under No. 119.

Complete.

Similar to the above.

Beginning :

अस्य श्रीरुद्रहृदयस्तोत्रमन्त्रस्य वेदव्यास ऋषिः, अनुष्टुप् छन्दः, ... येति शक्तिः, नम इति कीलकं, श्रीउमामहेश्वरप्रीत्यर्थे विनियोगः ।

शुक उवाच --

देवेशस्सर्वदेवेषु कस्मिन् देवाश्च सर्वशः ।
कस्य शुश्रुम . . . . . भवन्ति च ॥
तस्य तद्वचनं श्रुत्वा प्रत्युवाच पिता शुकम् ।

श्रीवेदव्यास उवाच—

सर्वदेवात्मको रुद्रस्सर्वे देवाश्शिवात्मकाः ।

*   *   *   *

रुद्रो दे(दि)वा उमा रात्रिस्तस्मै तस्यै नमो नमः ।
रुद्रो याग उमा वेदिस्तस्मै तस्यै नमो नमः ॥

End :

यत्र यत्र भवेत् साध्यामिमं मन्त्रमुदीरयेत् ।
रुद्रस्य हृदयं पुण्यमेवमेतदनामयम् ॥

दिव्यं च दैवतानां च सर्वस्य जगतः प्रियम् ।

* * * *

देवतायतने पक्षं मासं पक्षार्धमेव वा ।
ब्रह्मविष्णुमहेशानां क्रमाल्लोकानवाप्नुयात् ॥

Colophon:

श्रीउमामहेश्वरे रुद्रहृदयं संपूर्णम् ॥

No. 7092. रुद्रहोमः.

RUDRAHŌMAḤ.

Pages, 20. Lines, 4 on a page.

Begins on fol. 162*a* of the MS. described under No. 6414.

Complete.

On a fire-offering to propitiate Rudra by repeating the Vēdic passages forming the 5th Praśna in the 4th Kāṇḍa of the Taittirīya-Saṁhitā. This offering is considered to have the effect of averting evils of various kinds.

The Vēdic sentences are only indicated here by their beginnings.

Beginning:

नमस्ते रुद्र . . . नमः स्वाहा—रुद्राय इदं,
या त इषुः . . . मृडय स्वाहा—रुद्राय इदं,
या ते रुद्र शिवा . . चाकशीहि स्वाहा—मम,
यामिषुं गिरिशन्त . . जगत् स्वाहा—रुद्राय मम,
शिवेन वचसा त्वा . . सुमना असत् स्वाहा—रुद्राय ।

End:

वातो वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा दश प्रतीचीर्दशोदीचीर्दशोर्ध्वास्तेभ्यो नमः . . . दधामि स्वाहा—रु ॥

* * * *

स्यक्षा रुद्राक्षमालासुललितवपुषश्शाम्भवा मूर्तिभेदाः रुद्राश्श्रीरुद्र-
सूक्तप्रकटितविभवा नः प्रयच्छन्तु सौख्यम् ।

. * * * *

अयं मे हस्तो भगवानयं मे भगवत्तरः । अयं मे विश्वभेषजोऽयं
शिवाभिमर्शनः ॥

No. 7093. रुद्राध्यायमन्त्रः.
RUDRĀDHYĀYAMANTRAḤ.

Pages, 2 Lines, 4 on a page.

Begins on fol. 16*a* of the MS. described under No. 2279.

Complete.

This Mantra is in praise of Rudra. The Vēdic passages to be repeated are the same as those used in connection with the Rudrahōma noticed under the previous number.

Beginning:

अस्य श्रीरुद्राध्यायमन्त्रस्य अग्निकाण्ड ऋषिः, महाविराट् छन्दः, शम्भुर्देवता; नमस्ते रुद्र मन्यव इति बीजं, सहस्राणि सहस्रशो य इति शक्तिः, नमस्तारायेति कीलकं, मम शम्भुप्रीत्यर्थे जपे विनियोगः ।

End:

शुद्धस्फटिकसङ्काशं शुद्धविद्याप्रदं मृडम् ।
शुद्धं सच्चित्सुखानन्दं शुद्धं पूर्णमहं भजे ॥

ओं नमो भगवते रुद्राय । इमं मन्त्रं दशकृत्वः शतकृत्वः सहस्रकृत्वो वा जपित्वा रुद्रोक्तप्रकारेण जपेत् ॥

No. 7094. रेणुकापरमेश्वरीमन्त्रः.
RĒṆUKĀPARAMĒŚVARĪMANTRAḤ.

Page, 1. Lines, 6 on a page

Begins on fol. 117*a* of the MS. described under No. 5417.

Complete.

Rēṇukā referred to herein is probably the wife of Jamadagni and the mother of Paraśurāma. She is considered to be the presiding deity of small-pox and such other epidemics. The repetition of this Mantra is held to enable one to bring people under one's control and to annoy one's enemies in various ways.

Beginning :

अस्य श्रीरेणुकापरमेश्वरीमन्त्रस्य जमदग्निः ऋषिः, पङ्क्तिश्छन्दः, श्रीरेणुकापरमेश्वरी देवता ; ह्रीं बीजं, स्वाहा शक्तिः, रेणुकापरमेश्वरीप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End :

ओं ह्रीं नमो भगवति रक्तपक्ष्मि रेणुकादेवि दह दह पच पच अखिलजगन्मे वशं कुरु कुरु स्वाहा ।

ह्रीं इत्याद्यष्टत्रिंशद्वर्णैर्मूलमन्त्र . . . . इष्टार्थं भवति प्रसिद्धम् ॥

No. **7095.** लक्ष्मीकवचः.

LAKṢMĪKAVACAḤ.

Pages, 5. Lines, 18 on a page.

Begins on fol. 138*b* of the MS. described under No. 2373.

Complete.

This Mantra is addressed to Lakṣmī, and its repetition is held to have the power to remove one's sins, to secure protection to one from bad people and evil spirits, to remove diseases, and to confer prosperity on one, etc.

Beginning :

लक्ष्मीकवचम् ।

श्रीदेव्युवाच —

महालक्ष्मि(क्ष्म्याः) प्रवक्ष्यामि कवचं सर्वकामदम् ।
सर्वपापप्रशमनं दुष्टव्याधिविनाशनम् ॥

ग्रहपीडाप्रशमनमरिष्टव्र(व्रा)तभञ्जनम् ।
पुत्रपौत्रप्रजननं विवाहप्रदमिष्टदम् ॥

* * * *

महालक्ष्मीश्शिरः पातु ललाटं पङ्कजालया ।
कर्णौ मम रमा पातु नयने नलिनालया ॥

End :

यासापद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी
गम्भीरावर्तनाभिस्स्तनभरनमिता शुभ्रवस्त्रोत्तरीया ।
लक्ष्मीर्दिव्यैर्गजेन्द्रैर्मणिगणखचितैस्स्नापिता हेमकुम्भैः
नित्यं सा पद्महस्ता मम वसतु गृहे सर्वमाङ्गल्ययुक्ता ॥

Colophon :

इति श्रीलक्ष्मीकवचं संपूर्णम् ॥

No. **7096.** लक्ष्मीकवचः.

LAKṢMĪKAVACAḤ.

Substance, palm-leaf. **Size**, 7¾ × 1¼ inches. **Pages**, 6. **Lines**, 4 on a page. **Character**, Grantha. **Condition**, much injured. **Appearance**, new.

Begins on fol. 21*a*. The other works herein are **Bhagavadārādhana** 1*a*, Jitantēstōtra 12*a*, Paścimaraṅgamaṅgalāśaṁsana 24*a*.

Complete as found in the Varāhapurāṇa.

Similar to the above.

Beginning :

इन्द्र उवाच—
समस्तकवचानां च तेजश्श्रीकरमुत्तमम् ।
आयूरक्षणमारोग्यं सर्वं वै ब्रूहि गीष्पते ॥

गुरुरुवाच—
कवचस्मरणं नित्यं कुरु त्वममरेश्वर ।
चतुर्दशसु लोकेषु रहस्यं ब्रह्मनिर्मितम् ॥

शिरो मे विष्णुपत्नी च ललाटममृतोद्भवा ।
चक्षुः पातु विशालाक्षी श्रवणं सागरात्मजा ॥

End:

ब्रह्मणा लोकरक्षार्थं निर्मितं कवचं शुभम् ।
ये पठन्ति महात्मानस्ते वै रम्या जगत्पतेः ॥
आयुर्वृद्धिस्तथैवात्र पूर्वोक्ता ब्रह्मणा पुरा ।
मघवन् तन्मयाख्यातं सर्वाभीष्टफलप्रदम् ॥

Colophon:

इति श्रीवराहपुराणे लक्ष्मीकवचं संपूर्णम् ॥

No. 7097. लक्ष्मीकवचः.

LAKṢMĪKAVACAḤ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 7. Lines, 6 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 24*a*. The other works herein are Apāmārjananyāsa 1*a*, Apāmārjanakavaca 5*a*, Apāmārjanastōtra 8*b*, Sudarśanayantrōddhāra 28*a*, Lakṣmīstōtra 35*a*, Bhāgavataślōka 32*a*, Nālavēṣṭanaśānti 38*a*, Pakṣiṇyāśaucanirṇaya 40*a*.

Complete.

Similar to the above.

Beginning:

क्षीराब्धिमध्ये कल्पद्रुकानने दिव्यमण्टपे ।
सिंहासनस्थितां देवीममरीजनसेविताम् ॥
सुस्नातां पुष्पसुभगां कटकावलिभूषिताम् ।

* * * *

महालक्ष्मीः शिरः पातु ललाटं मम पद्मजा ।
कर्णौ रक्षेद्रमा पातु नयने नलिनालया ॥

End:

य इदं कवचं दिव्यं रमायाः प्रयतः पठेत् ।
सर्वसिद्धिमवाप्नोति सर्वरक्षां तु शाश्वतीम् ॥

* * * *

एवं देवीप्रसादेन शुकः कवचमाप्तवान् ।
कवचानुग्रहेणैव सर्वान् कामानवाप्नुयात् ॥

Colophon:

इति शुकब्रह्मसंवादे महालक्ष्मीकवचं सम्पूर्णम् ॥

No. 7098. लक्ष्मीगणपतिमन्त्रः.

LAKṢMĪGAṆAPATIMANTRAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 125*a* of the MS described under No. 29.

Complete.

This Mantra is addressed to Lakṣmīgaṇapati, one of the manifestations of Vināyaka. Its repetition is held to enable one to accomplish one's desires and to bring all people under one's influence and control.

Beginning:

अस्य श्रीलक्ष्मीगणपतिमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, ग्लां बीजं, ग्लीं शक्तिः, ग्लूं कीलकं, मम इष्टकाम्यार्थसिद्ध्यर्थे जपे विनियोगः ।

End:

ओं व्लूं ह्रीं श्रीं क्लीं ग्लां गं गणपतये वरवरद सर्वजनं मे वश-मानय स्वाहा ॥

No. 7099. लक्ष्मीगणपतिमन्त्रः.

LAKṢMĪGAṆAPATIMANTRAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 20*b* of the MS. described under No. 5928, wherein this Mantra has been omitted to be included among the other works given therein.

Complete.

Similar to the above. Held also to propitiate Dakṣiṇāmūrti or Śiva.

Beginning:

अस्य श्रीलक्ष्मीगणपतिमहामन्त्रस्य गणक ऋषिः, निचृद्गायत्री छन्दः, श्रीमहालक्ष्मीगणपतिर्देवता; गं बीजं, श्रीं शक्तिः, ग्लौं कीलकं, श्रीदक्षिणामूर्तिप्रसादसिद्ध्यर्थे जपे विनियोगः ।

End:

मनुः—

ओं श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा ॥

श्रीलक्ष्मीगणपतिपादुकां पूजयामि ॥

No. 7100. लक्ष्मीगणेशमन्त्रः.

LAKṢMĪGAṆEŚAMANTRAḤ.

Pages, 2. Lines, 20 on a page.

